योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः ६८

अज्ञातलेखकः

श्रीराम उवाच ।

कीदृशो भगवन्सङ्गः कथं बन्धाय वा नृणाम् ।

कश्च मोक्षाय कथितः कथं वैष चिकित्स्यते ।। १

श्रीवसिष्ठ उवाच ।

देहदेहिविभागैकपरित्यागेन भावनात् ।

देहमात्रे तु विश्वासः सङ्गो बन्धार्ह उच्यते ।। २

अनन्तस्यात्मतत्त्वस्य सपर्यन्तत्वनिश्चये ।

यत्सुखार्थित्वमन्तः स सङ्गो बन्धार्ह उच्यते ।। ३

सर्वमात्मेदमखिलं किं वाञ्छामि त्यजामि किम् ।

इत्यसङ्गस्थितिं विद्धि जीवन्मुक्ततनुस्थितिम् ।। ४

नाहमस्मि न चान्योऽस्ति मा भवन्तु भवन्तु वा ।

सुखान्यसक्त इत्यन्तः कथ्यते मुक्तिभाङ्नरः ।। ५

नाभिनन्दति नैष्कर्म्यं न कर्मस्वनुषज्जते ।

सुसमो यः फलत्यागी सोऽसंसक्त इति स्मृतः ।। ६

आत्मतत्त्वैकनिष्ठस्य हर्षामर्षवशं मनः ।

यस्य नायात्यसक्तोऽसौ जीवन्मुक्तः स कथ्यते ।। ७

सर्वकर्मफलादीनां मनसैव न कर्मणा ।

निपुणं यः परित्यागी सोऽसंसक्त इति स्मृतः ।। ८

असंसङ्गेन सकलाश्चेष्टा नाना विजृम्भिताः ।

चिकित्सिता भवन्तीह श्रेयः संपादयन्ति च ।। ९

संसक्तिवशतः सर्वे वितता दुःखराशयः ।

प्रयान्ति शतशाखत्वं श्वभ्रकण्टकवृक्षवत् ।। १०

रज्जुकृष्टघनघ्राणो यद्वत्या पथि गर्दभः ।

भारं वहति भीतात्मा तत्संसक्तिविजृम्भितम् ।। ११

शीतवातातपक्लेशमेकदेशनिषण्णया ।

तरुर्वहति यत्तन्वा तत्संसक्तिविजृम्भितम् ।। १२

धराविवरनिर्मग्नो यत्कीटः पीडिताङ्गकः ।

क्षिणोति विकलः कालं तत्संसक्तिविजृम्भितम् ।।१३

क्षुत्क्षामकुक्षिः क्षपयत्यायुर्व्याघातभीरुधीः ।

पक्षी वृक्षशिखाशायी तत्संसक्तिविजृम्भितम् ।। १४

दूर्वाङ्कुरतृणाहारः किरातशरपीडया ।

जहाति यन्मृगो देहं तत्संसक्तिविजृम्भितम् ।। १३

कृमिकीटत्वमायान्ति जायमानाः पुनःपुनः ।

यदिमा जनता जीर्णास्तत्संसक्तिविजृम्भितम् ।। १६

उत्पत्त्योत्पत्त्य लीयन्ते तरङ्गिणि तरङ्गवत् ।

भूतानि यदनन्तानि तत्संसक्तिविजृम्भितम् ।। १७

वीरुत्तृणदशां याता म्रियन्ते यत्पुनःपुनः ।

नरा विगतसंचारास्तत्संसक्तिविजृम्भितम् ।। १८

रसातलरसायोगात्तृणगुल्मलतादयः ।

जनयन्ति यदाकारं तत्संसक्तिविजृम्भितम् ।। १९

स्वानर्थान्तरसंकाशपदार्थशतसंकुला ।

यत्संसारनदी मत्ता तत्संसक्तिविजृम्भितम् ।। २०

संसक्तिर्द्विविधा प्रोक्ता वन्द्या वन्ध्या च राघव ।

वन्ध्या सर्वत्र मूढानां वन्द्या तत्त्वविदां निजा ।। २१

आत्मतत्त्वावबोधेन हीना देहादिवस्तुजा ।

भूयः संसारसक्तिर्या दृढा वन्ध्येति कथ्यते ।। २२

आत्मतत्त्वावबोधेन सत्यभूतविवेकजा ।

वन्द्या हि कथ्यते सक्तिर्भूयः संसारवर्जिता ।। २३

शङ्खचक्रगदाहस्तो देवो विविधयेहया ।

वन्द्यसंसक्तिवशतः परिपाति जगत्त्रयम् ।। २४

अनारतनिरालम्बं व्योम वर्त्मनि पान्थताम् ।

वन्द्यसंसक्तिवशतः करोति रविरन्वहम् ।। २५

महाकल्पसमाधानचिरकल्पितकल्पनम् ।

वन्द्यसंसक्तिवशतो ब्राह्मं स्फुरति वै वपुः ।। २६

लीलया ललनालानलीनं भूतिविभूषितम् ।

वन्द्यसंसक्तिवशतः शरीरं शाङ्करं स्थितम् ।। २७

विज्ञानगतयः सिद्धा लोकपालास्तथेतरे ।

वन्द्यसंसक्तिवशतस्तिष्ठन्ति जगतोऽङ्गणे ।। २८

धत्ते शारीरयन्त्रौघमन्या भुवनसंततिः ।

वन्द्यसंसक्तिवशतो जरामृतिविवर्जितम् ।। २९

मनः पतति भोगेषु गृध्रो मांसलवेष्विव ।

वन्द्यसंसक्तिवशतो व्यर्थया रम्यशङ्कया ।। ३०

संसक्तिवशतो वाति वायुर्भुवनकोटरे ।

पञ्चभूतानि तिष्ठन्ति वहतीयं जगत्स्थितिः ।। ३१

दिवि देवा भुवि नराः पाताले भोगिनोऽसुराः ।

ब्रह्माण्डोदुम्बरफले स्फुरन्मशकवत्स्थिताः ।। ३२

जायन्ते च म्रियन्ते च निपतन्त्युत्पतन्ति च ।

भूतानि यदनन्तानि तरङ्गिणि तरङ्गवत् ।। ३३

उत्पत्त्योत्पत्त्य लीयन्ते तत्संसक्तिविजृम्भितम् ।

भूतानि विरसं भूयो निर्झराम्बुकणा इव ।। ३४

परस्परनिगीर्णाङ्गा जनता जाड्यजर्जरा ।

संभ्रान्ता प्रभ्रमत्यङ्ग शीर्णपर्णमिवाम्वरे ।। ३५

नक्षत्रचक्रं गगने द्रुमे मशकसंततिः ।

स्फुरत्यावर्तवृत्त्यैव पातालेऽङ्ग जलौघवत् ।। ३६

पातोत्पातदशाजीर्णं कालबालककन्दुकम् ।

अद्यापि न जहातीन्दुर्जलमामलिनं वपुः ।। ३७

नानापारयुगावर्तदुःखालोकनकर्कशम् ।

न लुनाति मनःखण्डं दुःखिगीर्वाणमण्डलम् ।। ३८

वासनामात्रवशतः परे व्योमनि केनचित् ।

इदमारचितं चित्रं विचित्रं पश्य राघव ।। ३९

मनःसङ्कैकरङ्गेण शून्ये व्योम्नि जगन्मयम् ।

यदिदं रचितं चित्रं तत्सत्यं न कदाचन ।। ४०

संसक्तमनसामस्मिन्संसारे व्यवहारिणाम् ।

अत्ति तृष्णा शरीराणि तृणान्यग्निशिखा यथा ।। ४१

परिसक्तमतेर्देहान्सिकताः पत्युरम्भसाम् ।

कः शक्तः परिसंख्यातुं त्रसरेणुगणं यथा ।। ४२

मुक्तालताया गङ्गाया मेरोरापादमस्तकम् ।

तरङ्गमुक्ता गण्यन्ते न देहाः सक्तचेतसाम् ।। ४३

संसक्तमनसामेता रम्यान्तःपुरपङ्क्तयः ।

रचिता रौरवा वीचिकालसूत्रादिनामिकाः ।। ४४

सक्तचित्तं जनं दुःखशुष्कमिन्धनसंचयम् ।

ज्वलतां नरकाग्नीनां विद्धि तेन ज्वलन्ति ते ।। ४५

दुःखजालमिदं नाम यत्किंचिज्जगतीगतम् ।

संसक्तमनसामर्थे तत्सर्वं परिकल्पितम् ।। ४६

संसक्तचित्तमायान्ति सर्वा दुःखपरम्पराः ।

जलकल्लोलवलिता महानद्य इवाम्बुधिम् ।। ४७

मनःसंसर्गरूपिण्या भारूभूतशरीरया ।

क्षयोदयदशार्थिन्या सर्वं ततमविद्यया ।। ४८

असंसङ्गेन भोगानां सर्वा राम विभूतयः ।

परं विस्तारमायान्ति प्रावृषीव महापगाः ।। ४९

अन्तःसंसङ्गमङ्गानामङ्गारं विद्धि राघव ।

अनन्तःसङ्गमङ्गानां विद्धि राम रसायनम् ।। ५०

संसङ्गेनान्तरस्थेन दह्यते प्रकृतिः स्वयम् ।

स्वकलोत्थे नैरकाङ्क्षी पावकेन यथौषधिः ।। ५१

सर्वत्रासक्तमाशान्तमनन्तमिव संस्थितम् ।

असत्कल्पं सदाभासं सुखायैव मनो भवेत् ।। ५२

विद्यादृशि प्रोदयमागतेन क्षयं त्वविद्याविषये गतेन ।

सर्वत्र संसक्तिविवर्जितेन स्वचेतसा तिष्ठति यः स मुक्तः ।। ५३

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषूपशमप्रकरणे सङ्गविचारयोगोपदेशो नामाष्टषष्टितमः सर्गः ।। ६८ ।।